# वेदान्त सार

## Chapter 1

### Topic 1

अखण्डं सच्चिदानन्दं अवाङ्मनसगोचरम्। ।

आत्मानं अखिलाधारं आश्रयेऽभीष्टसिद्धये॥ १॥

akhaṇḍaṁ saccidānandaṁ avāṅmanasagocaram|

ātmānaṁ akhilādhāraṁ āśraye'bhīṣṭasiddhaye||1||

### Topic 2

अर्थतोऽप्यद्वयानन्दान् अतीतद्वैतभानतः।

गुरूनाराध्य वेदान्त सारं वक्ष्ये ये यथामति॥ २॥

arthato'pyadvayānandān atītadvaitabhānataḥ|

gurūnārādhya vedānta sāraṁ vakṣye yathāmati||2||

## Topic 3

वेदान्त नामः उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादिनि च॥ ३ ॥

vedānta nāmaḥ upaniṣatpramāṇaṁ tadupakārīṇi śārīrakasūtrādini ca||3||

## Topic 4

अस्य वेदान्तप्रकरणत्वात् तदीयैः एव अनुबन्धैः।

तद्वत्तासिद्धैः तद्वतासिद्धैः न ते प्रथगालोचनीयाः॥४॥

asya vedāntaprakaraṇatvāt tadīyaiḥ eva anubandhaiḥ|

tadvattāsiddhaiḥ na te prathagālocanīyāḥ||4||

## Topic 5

तत्र अनुबन्धो नाम अधिकारि विषय सम्बन्ध प्रयोजनानि ॥ ५॥

tatra anubandho nāma adhikāri viṣaya sambandha prayojanāni || 5||

## Topic 6

अधिकारी तु विधिवत् अधीतवेद्वेदाङ्गत्वेन आपाततो अधिगताखिल-

वेदार्थो अस्मिन् जन्मनि जन्मान्तरे वा काम्य निषिद्धवर्जनपुरःसरं

नित्यनैमित्तिक प्रायश्चित्तः उपासनानुष्ठानेन निर्गत निखिलकल्मषतया

नितान्त निर्मलस्वान्तः साधनचतुष्टय सम्पन्नः प्रमाता ॥ ६॥

adhikārī tu vidhivat adhītavedavedāṅgatvena āpātato adhigatākhila- vedārtho asmin janmani janmāntare vā kāmya niṣiddhavarjanapuraḥsaraṁ nityanaimittika prāyaścittaḥ upāsanānuṣṭhānena nirgata nikhilakalmaṣatayā nitānta nirmalasvāntaḥ sādhanacatuṣṭaya sampannaḥ pramātā || 6||

## Topic 7

**काम्यानि – स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ॥ ७॥**

kāmyāni svargādīṣṭasādhanāni jyotiṣṭomādīni || 7||

## Topic 8

**निषिद्धानि – नरकाद्यनिष्ट साधनानि ब्राह्मणहननादीनि ॥ ८॥**

niṣiddhāni narakādyaniṣṭa sādhanāni brāhmaṇahananādīni || 8||

## Topic 9

**नित्यानि - अकरणे प्रत्यवाय साधनानि सन्ध्यावन्दनादीनि ॥ ९॥**

nityāni - akaraṇe pratyavāya sādhanāni sandhyāvandanādīni || 9||

Topic 10

नैमित्तिकानि - पुत्रजन्मात् अनुबन्धीनि जातेष्ट्यादीनि ॥ १०॥

naimittikāni - putrajanmāt anubandhīni jāteṣṭyādīni || 10||

Topic 11

प्रायश्चित्तानि – पापक्षय साधनानि चान्द्रायणादीनि ॥ ११॥

prāyaścittāni  pāpakṣaya sādhanāni cāndrāyaṇādīni || 11||

Topic 12

उपासनानि – सगुणब्रह्म विषय मानस व्यापाररूपाणि शाण्डिल्यविद्यादीनि ॥ १२॥

upāsanāni saguṇabrahma viṣaya mānasa vyāpārarūpāṇi śāṇḍilyavidyādīni || 12||

## Topic 13

एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनम् उपासनानां तु चित्तैकाग्र्यम् "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" (बृ उ ४.४.२२] इत्यादि श्रुतेः

"तपसा कल्मषं हन्ति" (मनु १२ - १०४] इत्यादि स्मृतेश्च ॥ १३॥

eteṣāṁ nityādīnāṁ buddhiśuddhiḥ paraṁ prayojanam upāsanānāṁ tu cittaikāgryam tametamātmānaṁ vedānuvacanena brāhmaṇā vividiṣanti yajñena

tapasā kalmaṣaṁ hanti ityādi smṛteśca || 13||

## Topic 14

नित्यनैमित्तिकयोः उपासनानां तु अवान्तरफलं पितृलोक सत्यलोक प्राप्तिः

"कर्मणा पितृलोकः विद्यया देवलोकः" (बृ उ १-५-१६] इत्यादिश्रुतेः ॥ १४॥

nityanaimittikayoḥ upāsanānāṁ tu avāntaraphalaṁ pitṛloka satyaloka prāptiḥ karmaṇā pitṛlokaḥ vidyayā devalokaḥ (Brd. up 1-5-16) ityādiśruteḥ || 14||

Topic 15

साधनानि – नित्यानित्यवस्तु विवेक इहामुत्रार्थ फलभोग विराग शमादिषट्क सम्पत्ति

मुमुक्षुत्वानि ॥ १५॥

sādhanāni  nityānityavastu viveka ihāmutrārtha phalabhoga

virāga śamādiṣaṭka sampatti mumukṣutvāni || 15||

Topic 16

नित्यानित्यवस्तु विवेक तावदत्  ब्रह्मैव नित्यं वस्तु

ततो अन्यत् अखिलम् अनित्यमिति विवेचनम् ॥ १६॥

nityānityavastu viveka tāvadat  brahmaiva nityaṁ vastu

tato anyat akhilam anityamiti vivecanam || 16||

## Topic 17

ऐहिकानां स्त्रक्चन्दनवनितादि विषयभोगानां कर्मजन्यतया अनित्यत्ववत् आमुष्मिकाणाम् अपि अमृतादि विषयभोगानाम् अनित्यतया तेभ्यो नितरां विरतिः इहामुत्रार्थ फलभोगविरागः ॥ १७॥

aihikānāṁ srakcandanavanitādi viṣayabhogānāṁ karmajanyatayā anityatvavat āmuṣmikāṇām api amṛtādi viṣayabhogānām anityatayā tebhyo nitarāṁ viratiḥ ihāmutrārtha phalabhogavirāgaḥ || 17||

## Topic 18

शमादयस्तु – शमदम उपरतितितिक्षा समाधान श्रद्धाख्याः ॥ १८॥

śamādayastu śamadama uparatititikṣā samādhāna śraddhākhyāḥ || 18||

Topic 19

शमस्तावत् – श्रवणादि व्यतिरिक्त विषयेभ्यो मनसो निग्रहः ॥ १९॥

śamastāvat  śravaṇādi vyatirikta viṣayebhyo manaso nigrahaḥ || 19||

Topic 20

दमः - बाह्येन्द्रियाणां तद्व्यतिरिक्त विषयेभ्यो निवर्तनम् ॥ २०॥

damaḥ - bāhyendriyāṇāṁ tadvyatirikta viṣayebhyo nivartanam || 20||

Topic 21

निवर्तितानाम् एतेषां तद्व्यतिरिक्त विषयेभ्य उपरमणमुपरति अथवा विहितानां कर्मणां विधिना परित्यागः ॥ २१॥

nivartitānām eteṣāṁ tadvyatirikta viṣayebhya uparamaṇamuparati athavā vihitānāṁ karmaṇāṁ vidhinā parityāgaḥ || 21

Topic 22

तितिक्षा – शीतोष्णादि द्वन्द्वसहिष्णुता ॥ २२॥

titikṣā  śītoṣṇādi dvandvasahiṣṇutā || 22||

Topic 23

निगृहीतस्य मनसः श्रवणादौ तदनुगुण विषये च समाधिः  समाधानम् ॥ २३॥

Topic 24

गुरूपदिष्ट वेदान्तवाक्येषु विश्वासः - श्रद्धा ॥ २४॥

gurūpadiṣṭa vedāntavākyeṣu viśvāsaḥ - śraddhā || 24||

Topic 25

मुमुक्षुत्वम् - मोक्षेच्छा ॥ २५॥

mumukṣutvam - mokṣecchā || 25||

Topic 26

एवम्भूतः प्रमाताधिकारी ``शान्तो दान्त"  (बृ उ ४.४.२३) इत्यादिश्रुतेः ।

उक्तञ्च -``प्रशान्तचित्ताय जितेन्द्रियाय च   प्रहीणदोषाय यथोक्तकारिणे ।

गुणान्वितायानुगताय सर्वदा   प्रदेयमेतत् सततं मुमुक्षवे   इति  (उपदेशसाहस्री १६.७२) ॥ २६॥"

evambhūtaḥ pramātādhikārī śānto dānta ityādiśruteḥ | (brhd. Up. 4.4.23)

uktañca -praśāntacittāya jitendriyāya ca   prahīṇadoṣāya yathoktakāriṇe |

guṇānvitāyānugatāya sarvadā   pradeyametat satataṁ mumukṣave  iti(upadesha saahasri 16.72  || 26||

Topic 27

विषयः - जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्र एव वेदान्तानां तात्पर्यात् ॥ २७॥

viṣayaḥ - jīvabrahmaikyaṁ śuddhacaitanyaṁ prameyaṁ

tatra eva vedāntānāṁ tātparyāt || 27||

Topic 28

सम्बन्धस्तु – तदैक्य प्रमेयस्य तत्प्रतिपादक उपनिषत्प्रमाणस्य

च बोध्यबोधकभावः ॥ २८॥

sambandhastu  tadaikya prameyasya tatpratipādaka

upaniṣatpramāṇasya  ca bodhyabodhakabhāvaḥ || 28||

Topic 29

प्रयोजनं तु – तदैक्यप्रमेयगत अज्ञाननिवृत्तिः स्वस्वरूपानन्द आवाप्तिश्च ``तरति शोकम् आत्मवित् "    (छां उ ७.१.३) इत्यादिश्रुतेः

"ब्रह्मविद् ब्रह्मैव भवति ``  (मुण्ड उ  ३.२.९) इत्यादिश्रुतेश्च ॥ २९॥

prayojanaṁ tu  tadaikyaprameyagata ajñānanivṛttiḥ

svasvarūpānanda āvāptiśca tarati śokam ātmavit "

ityādiśruteḥ

"brahmavid brahmaiva bhavati"     ityādiśruteśca || 29||

Topic 30

अयमधिकारी जननमरणादि संसारानलसन्तप्तो दीप्तशिरा

जलराशिमिव उपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य

तमनुसरति ``तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः

श्रोत्रियं ब्रह्मनिष्ठम्" (मुण्ड उ १.२.१२) इत्यादिश्रुतेः ॥ ३०॥

ayamadhikārī jananamaraṇādi saṁsārānalasantapto dīptaśirā

jalarāśimiva upahārapāṇiḥ śrotriyaṁ brahmaniṣṭhaṁ gurumupasṛtya

tamanusarati tadvijñānārthaṁ sa gurumevābhigacchet samitpāṇiḥ śrotriyaṁ brahmaniṣṭham ityādiśruteḥ || 30||

Topic 31

स गुरुः परमकृपया अध्यारोप अपवाद् न्यायेन एनमुपदिशति

``तस्मै स विद्वानुपसन्नया सम्यक्      प्रशान्तचित्ताय शमान्विताय ।

येनाक्षरं पुरुषं वेद सत्यं      प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥" (मुण्ड उ १.२.१३)

इत्यादिश्रुतेः ॥ ३१॥

sa guruḥ paramakṛpayā adhyāropa apavāda nyāyena enamupadiśati

tasmai sa vidvānupasannayā samyak      praśāntacittāya śamānvitāya |

yenākṣaraṁ puruṣaṁ veda satyaṁ      provāca tāṁ tattvato brahmavidyām || ityādiśruteḥ || 31||

## Chapter 2

### Topic 32

असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः - अध्यारोपः ॥ ३२॥

asarpabhūtāyāṁ rajjau sarpāropavat vastuni avastvāropaḥ - adhyāropaḥ || 32

### Topic 33

वस्तु - सच्चिदानन्दमद्वयं ब्रह्म  अज्ञानादि सकलजडसमूहोऽवस्तु ॥ ३३॥

vastu - saccidānandamadvayaṁ brahma  ajñānādi sakalajaḍasamūho'vastu || 33||

Topic 34

अज्ञानं तु - सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्ति अहमज्ञ इति आद्यनुभवात् ``देवात्मशक्तिं स्वगुणैर्निगूढाम्" (श्वेत उ १.३) इत्यादिश्रुतेश्च ॥ ३४॥

ajñānaṁ tu - sadasadbhyām anirvacanīyaṁ triguṇātmakaṁ jñānavirodhi bhāvarūpaṁ yatkiñciditi vadanti ahamajña iti ādyanubhavāt devātmaśaktiṁ svaguṇairnigūḍhām ityādiśruteśca || 34||

Topic 35

इदमज्ञानं समष्टिव्यष्टि अभिप्रायेण एकमनेकमिति च व्यवह्रियते ॥ ३५॥

samaṣṭivyaṣṭi abhiprāyeṇa ekamanekamiti ca vyavahriyate || 35||

## Topic 36

**तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्व व्यपदेशो यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्व व्यपदेशः ``अजामेकां" (श्वे उ ४.५) इत्यादिश्रुतेः ॥ ३६॥**

tathāhi yathā vṛkṣāṇāṁ samaṣṭyabhiprāyeṇa vanamityekatva vyapadeśo yathā vā jalānāṁ samaṣṭyabhiprāyeṇa jalāśaya iti tathā nānātvena pratibhāsamānānāṁ jīvagatājñānānāṁ samaṣṭyabhiprāyeṇa tadekatva vyapadeśaḥ ajāmekāṁ

ityādiśruteḥ || 36||

## Topic 37

**इयं समष्टिः उत्कृष्टोपाधितया विशुद्धसत्त्व प्रधाना ॥ ३७॥**

iyaṁ samaṣṭiḥ utkṛṣṭopādhitayā viśuddhasattva pradhānā || 37||

## Topic 38

एतदुपहितं चैतन्यं सर्वज्ञत्व सर्वेश्वरत्व सर्वनियन्तृत्वादि गुणकम् अव्यक्तम् अन्तर्यामी

जगत्कारणमीश्वर इति च व्यपदिश्यते सकल अज्ञान अवभासकत्वात् ।

``यः सर्वज्ञः सर्ववित्” (मुण्ड उ १.१.९) इति श्रुतेः ॥ ३८॥

etadupahitaṁ caitanyaṁ sarvajñatva sarveśvaratva sarvaniyantṛtvādi guṇakam avyaktam antaryāmī

jagatkāraṇamīśvara iti ca vyapadiśyate sakala ajñāna avabhāsakatvāt | yaḥ sarvajñaḥ sarvavit iti śruteḥ || 38||

## Topic 39

ईश्वरस्य इयं समष्टिः अखिल कारणत्वात् कारणशरीरम् आनन्दप्रचुरत्वात् कोशवदाच्छादकत्वात् च आनन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्म प्रपञ्च लयस्थानमिति च उच्यते ॥ ३९॥

īśvarasya iyaṁ samaṣṭiḥ akhila kāraṇatvāt kāraṇaśarīram ānandapracuratvāt kośavadācchādakatvāt ca

ānandamayakośaḥ sarvoparamatvāt suṣuptiḥ ata eva sthūlasūkṣma prapañca layasthānamiti ca ucyate || 39||

Topic 40

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इति अनेकत्व व्यपदेशो यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथा अज्ञानस्य व्यष्ट्यभिप्रायेण तद् अनेकत्व व्यपदेशः ``इन्द्रो मायाभिः पुरुरूप ईयते" (ऋग्वेद ६.४७.१८) इत्यादिश्रुतेः ॥ ४० ॥

yathā vanasya vyaṣṭyabhiprāyeṇa vṛkṣā iti anekatva vyapadeśo yathā vā jalāśayasya vyaṣṭyabhiprāyeṇa jalānīti tathā ajñānasya vyaṣṭyabhiprāyeṇa tad anekatva vyapadeśaḥ indro māyābhiḥ pururūpa īyate ityādiśruteḥ || 40||

Topic 41

अत्र व्यस्त समस्त व्यापित्वेन व्यष्टि समष्टिता व्यपदेशः ॥ ४१ ॥

atra vyasta samasta vyāpitvena vyaṣṭi samaṣṭitā vyapadeśaḥ || 41||

## Topic 42

इयं व्यष्टिः निकृष्टोपाधितया मलिनसत्त्व प्रधाना ॥ ४२॥

iyaṁ vyaṣṭiḥ nikṛṣṭopādhitayā malinasattva pradhānā || 42||

## Topic 43

एतदुपहितं चैतन्यम् अल्पज्ञत्व अनीश्वरत्वादि गुणकं प्राज्ञ इत्युच्यत एक अज्ञानावभासकत्वात् ॥ ४३॥

etadupahitaṁ caitanyam alpajñatva anīśvaratvādi guṇakaṁ prājña ityucyata eka ajñānāvabhāsakatvāt || 43||

## Topic 44

अस्य प्राज्ञत्वम् अस्पष्टोपाधितया अनतिप्रकाशकत्वात् ॥ ४४॥

asya prājñatvam aspaṣṭopādhitayā anatiprakāśakatvāt || 44||

## Topic 45

अस्यापीयम् अहङ्कारादि कारणत्वात् कारणशरीरम् आनन्द प्रचुरत्वात् कोशवदाच्छादकत्वात् च आनन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्मशरीर प्रपञ्च लयस्थानमिति च उच्यते ॥ ४५॥

asyāpīyam ahaṅkārādi kāraṇatvāt kāraṇaśarīram ānanda pracuratvāt kośavadācchādakatvāt ca ānandamayakośaḥ sarvoparamatvāt suṣuptiḥ ata eva sthūlasūkṣmaśarīra prapañca layasthānamiti ca ucyate || 45||

## Topic 46

तदानीं एतौ ईश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिः अतिसूक्ष्माभिः अज्ञानवृत्तिभिः आनन्दमनुभवतः “आनन्दभुक् चेतोमुखःप्राज्ञः” (माण्डू उ ५) इति श्रुतेः सुखमहम् अस्वाप्सम्

न किञ्चिदवेदिषमिति उत्थितस्य परामर्शोपपत्तेश्च ॥ ४६॥

tadānīṁ etau īśvaraprājñau caitanyapradīptābhiḥ atisūkṣmābhiḥ ajñānavṛttibhiḥ ānandamanubhavataḥ ānandabhuk cetomukhaḥprājñaḥ iti śruteḥ sukhamaham asvāpsam na kiñcidavediṣamiti utthitasya parāmarśopapatteśca || 46||

**Topic 47**

अनयोः समष्टिव्यष्ट्योः वनवृक्षयोरिव जलाशय जलयोरिव वा अभेदः ॥ ४७॥

anayoḥ samaṣṭivyaṣṭyo vanavṛkṣayoriva jalāśaya jalayoriva vā abhedaḥ || 47||

**Topic 48**

एतदुपहितयोः ईश्वरप्राज्ञयोरपि वनवृक्षा अवच्छिन्नाकाशयोरिव जलाशयजलगत प्रतिबिम्बाकाशयोरिव वा अभेदः ``एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामि एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्" (माण्डू उ ६) इत्यादि श्रुतेः ॥ ४८॥

etadupahitayoḥ īśvaraprājñayorapi vanavṛkṣā avacchinnākāśayoriva jalāśayajalagata pratibimbākāśayoriva

vā abhedaḥ eṣa sarveśvara eṣa sarvajña eṣo'ntaryāmi eṣa yoniḥ sarvasya prabhavāpyayau hi bhūtānām ityādi śruteḥ || 48||

**Topic 49**

वनवृक्ष तदवच्छिन्नाकाशयोः जलाशयजल तद्गतप्रतिबिम्बाकाशयोर्वा आधारभूत अनुपहिताकाशवत् अनयोः अज्ञानतदुपहितचैतन्ययोः आधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते ``शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते (स आत्मा स विज्ञेयः)"

(माण्डू उ ७) इत्यादिश्रुतेः ॥ ४९॥

vanavṛkṣa tadavacchinnākāśayoḥ jalāśayajala tadgatapratibimbākāśayorvā ādhārabhūta anupahitākāśavat anayoḥ ajñānatadupahitacaitanyayoḥ ādhārabhūtaṁ yadanupahitaṁ caitanyaṁ tatturīyamityucyate śāntaṁ śivamadvaitaṁ caturthaṁ manyante sa ātmā sa vijñeyaḥ

māṇḍū u 7 ityādiśruteḥ || 49||

## Topic 50

इदमेव तुरीयं शुद्धचैतन्यम् अज्ञानादितदुपहित चैतन्याभ्यां तप्तायः

पिण्डवत् अविविक्तं सत् महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ॥ ५०॥

idameva turīyaṁ śuddhacaitanyam ajñānāditadupahita caitanyābhyāṁ taptāyaḥ

piṇḍavat aviviktaṁ sat mahāvākyasya vācyaṁ viviktaṁ sallakṣyamiti cocyate || 50||

## Topic 51

अस्य अज्ञानस्य आवरण विक्षेपनामकम् अस्ति शक्तिद्वयम् ॥ ५१॥

asya ajñānasya āvaraṇa vikṣepanāmakam asti śaktidvayam || 51||

Topic 52

आवरणशक्तिः तावत् अल्पोऽपि मेघः अनेकयोजनायतम् आदित्य मण्डलम् अवलोकयितृ नयनपथ पिधायकतया यथा आच्छादयतीव तथाज्ञानं परिच्छिन्नम् अपि आत्मानम् अपरिच्छिन्नम् असंसारिणम् अवलोकयितृ बुद्धि पिधायकतया आच्छादयतीव तादृशं सामर्थ्यम् ।

तदुक्तं - ``घनच्छन्नदृष्टिः घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः । तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥" इति (हस्तामलकम् १०) ॥ ५२॥

āvaraṇaśaktih tāvat alpo'pi meghaḥ anekayojanāyatam āditya maṇḍalam avalokayitṛ nayanapatha pidhāyakatayā yathā ācchādayatīva tathājñānaṁ paricchinnam api ātmānam aparicchinnam asaṁsāriṇam avalokayitṛ buddhi pidhāyakatayā ācchādayatīva tādṛśaṁ sāmarthyam ǀ

taduktaṁ - ghanacchannadṛṣṭiḥ ghanacchannamarkaṁ yathā manyate niṣprabhaṁ cātimūḍhaḥ ǀ tathā baddhavadbhāti yo mūḍhadṛṣṭeḥ sa nityopalabdhisvarūpo'hamātmā ǀǀ

52ǀǀ

Topic 53

अनया आवृतस्यात्मनः कर्तृत्वभोक्तृत्व सुखित्वदुःखित्वादि संसार सम्भावनापि

भवति यथा स्वाज्ञानेन आवृतायां रज्ज्वां सर्पत्व सम्भावना ॥ ५३॥

anayā āvṛtasyātmanaḥ kartṛtvabhoktṛtva sukhitvaduḥkhitvādi

saṁsāra sambhāvanāpi

bhavati yathā svājñānena āvṛtāyāṁ rajjvāṁ sarpatva

sambhāvanā || 53||

## Topic 54

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृत रज्जौ स्वशक्त्या सर्पादिकम् उद्भावयति एवमज्ञानमपि स्वावृतात्मनि स्वशक्त्या आकाशादि प्रपञ्चम् उद्भावयति तादृशं सामर्थ्यम् ।

तदुक्तम् - ``विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत्" इति । (वाक्यसुधा १३) ॥ ५४॥

vikṣepaśaktistu yathā rajjvajñānaṁ svāvṛta rajjau svaśaktyā sarpādikam udbhāvayati evamajñānamapi svāvṛtātmani svaśaktyā ākāśādi prapañcam udbhāvayati tādṛśaṁ sāmarthyam ।

taduktam - vikṣepaśaktirliṅgādi brahmāṇḍāntaṁ jagat sṛjet iti || 54||

## Topic 55

शक्तिद्वयवत् अज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधि प्रधानत या उपादानं च भवति ॥ ५५॥

śaktidvayavat ajñānopahitaṁ caitanyaṁ svapradhānatayā nimittaṁ svopādhi pradhānata yā upādānaṁ ca bhavati || 55||

Topic 56

यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतया उपादानञ्च भवति ॥ ५६ ॥

yathā lūtā tantukāryaṁ prati svapradhānatayā nimittaṁ svaśarīrapradhānatayā upādānañca bhavati || 56||

Topic 57

तमःप्रधान विक्षेपशक्तिमत् अज्ञानोपहित चैतन्यादाकशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी चोत्पद्यते ``एतस्मादात्मन आकाशः सम्भूतः" (तै उ २.१.१) इत्यादिश्रुतेः ॥ ५७॥

tamaḥpradhāna vikṣepaśaktimat ajñānopahita caitanyādākaśaḥ ākāśādvāyuḥ rvāyoragni agnerāpa adbhyaḥ

pṛthivī cotpadyate etasmādātmana ākāśaḥ sambhūtaḥ ityādiśruteḥ || 57||

**Topic 58**

तेषु जाड्याधिक्यदर्शनात् तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुण प्रक्रमेण तेषु आकाशादिषु उत्पद्यन्ते ॥ ५८॥

teṣu jāḍyādhikyadarśanāt tamaḥprādhānyaṁ tatkāraṇasya | tadānīṁ sattvarajastamāṁsi kāraṇaguṇa prakrameṇa teṣu ākāśādiṣu utpadyante || 58||

**Topic 59**

एतान्येव सूक्ष्मभूतानि तन्मात्राणि अपञ्चीकृतानि चोच्यन्ते ॥ ५९॥

etānyeva sūkṣmabhūtāni tanmātrāṇi apañcīkṛtāni cocyante || 59||

**Topic 60**

एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि च उत्पद्यन्ते ॥ ६०॥

etebhyaḥ sūkṣmaśarīrāṇi sthūlabhūtāni ca utpadyante || 60||

### Topic 61

सूक्ष्मशरीराणि सप्तदश अवयवानि लिङ्गशरीराणि ॥ ६१॥

sūkṣmaśarīrāṇi saptadaśa avayavāni liṅgaśarīrāṇi || 61||

### Topic 62

अवयवास्तु ज्ञानेन्द्रिय पञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति ॥ ६२॥

avayavāstu jñānendriya pañcakaṁ buddhimanasī
karmendriyapañcakaṁ vāyupañcakaṁ ceti || 62||

### Topic 63

ज्ञानेन्द्रियाणि श्रोत्र त्वक् चक्षुः जिह्वा घ्राणाख्यानि ॥ ६३॥

jñānendriyāṇi śrotra tvak cakṣuḥ jihvā ghrāṇākhyāni || 63||

Topic 64

एतानि आकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेण उत्पद्यन्ते ॥ ६४॥

etāni ākāśādīnāṁ sāttvikāṁśebhyo vyastebhyaḥ pṛthak pṛthak krameṇa utpadyante || 64||

Topic 65

बुद्धिर्नाम निश्चयात्मिक अन्तःकरणवृत्तिः ॥ ६५॥

buddhirnāma niścayātmika antaḥkaraṇavṛttiḥ || 65||

Topic 66

मनो नाम सङ्कल्पविकल्पात्मिक अन्तःकरणवृत्तिः ॥ ६६॥

mano nāma saṅkalpavikalpātmika antaḥkaraṇavṛttiḥ || 66||

Topic 67

अनयोरेव चित्ताहङ्कारयोः अन्तर्भावः ॥ ६७॥

anayoreva cittāhaṅkārayoḥ antarbhāvaḥ || 67||

## Topic 68

अनुसन्धानात्मिक अन्तःकरणवृत्तिः चित्तम् ॥ ६८॥

anusandhānātmika antaḥkaraṇavṛttiḥ cittam || 68||

## Topic 69

अभिमानात्मिक अन्तःकरणवृत्तिः अहङ्कारः ॥ ६९॥

abhimānātmika antaḥkaraṇavṛttiḥ ahaṅkāraḥ || 69||

## Topic 70

एते पुनः आकाशादिगत सात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते ॥ ७०॥

ete punaḥ ākāśādigata sāttvikāṁśebhyo militebhya utpadyante || 70||

## Topic 71

एतेषां प्रकाशात्मकत्वात् सात्त्विकांश कार्यत्वम् ॥ ७१॥

eteṣāṁ prakāśātmakatvāt sāttvikāṁśa kāryatvam || 71||

Topic 72

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति ॥ ७२॥

iyaṁ buddhirjñānendriyaiḥ sahitā vijñānamayakośo bhavati || 72||

Topic 73

अयं कर्तृत्व भोक्तृत्व सुखित्व दुःखित्वादि अभिमानत्वेन इहलोकपरलोक गामी व्यवहारिको जीव इत्युच्यते ॥ ७३॥

ayaṁ kartṛtva bhoktṛtva sukhitva duḥkhitvādi abhimānatvena ihalokaparaloka gāmī vyavahāriko jīva ityucyate || 73|

Topic 74

मनस्तु ज्ञानेन्द्रियैः सहितं सत् मनोमयकोशो भवति ॥ ७४॥

manastu jñānendriyaiḥ sahitaṁ sat manomayakośo bhavati || 74||

Topic 75

कर्मेन्द्रियाणि वाक्पाणिपाद् पायु उपस्थाख्यानि ॥ ७५॥

karmendriyāṇi vākpāṇipāda pāyu upasthākhyāni || 75||

Topic 76

एतानि पुनः आकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते ॥ ७६॥

etāni punaḥ ākāśādīnāṁ rajoṁśebhyo vyastebhyaḥ pṛthak pṛthak krameṇotpadyante || 76||

Topic 77

वायवः प्राणापान व्यान उदान समानाः ॥ ७७॥

vāyavaḥ prāṇāpāna vyāna udāna samānāḥ || 77||

Topic 78

प्राणो नाम प्राग्गमनवान् नासा ग्रस्थानवर्ती ॥ ७८॥

prāṇo nāma prāggamanavān nāsā grasthānavartī || 78||

## Topic 79

अपानो नामा अवाग्गमनवान् पाय्वादिस्थानवर्ती ॥ ७९॥

apāno nāmā avāggamanavān pāyvādisthānavartī || 79||

## Topic 80

व्यानो नाम विष्वग्गमनवान् अखिल शरीरवर्ती ॥ ८०॥

vyāno nāma viṣvaggamanavān akhila śarīravartī || 80||

## Topic 81

उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवान् उत्क्रमणवायुः ॥ ८१॥

udāno nāma kaṇṭhasthānīya ūrdhvagamanavān utkramaṇavāyuḥ || 81||

## Topic 82

समानो नाम शरीरमध्यगत अशितपीतान्नादि समीकरणकरः ॥ ८२॥

samāno nāma śarīramadhyagata aśitapītānnādi samīkaraṇakaraḥ || 82||

Topic 83

समीकरणन्तु परिपाककरणं रसरुधिर शुक्र पुरीषादि करणमिति यावत् ॥ ८३॥

samīkaraṇantu paripākakaraṇaṁ rasarudhira śukra purīṣādi karaṇamiti yāvat || 83||

Topic 84

केचित्तु नागकूर्म कृकल देवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति ॥ ८४॥

kecittu nāgakūrma kṛkala devadattadhanañjayākhyāḥ pañcānye vāyavaḥ santīti vadanti || 84||

Topic 85

तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकलः क्षुत्करः । देवदत्तो जृम्भणकरः । धनञ्जयः पोषणकरः ॥ ८५॥

tatra nāga udgiraṇakaraḥ | kūrma unmīlanakaraḥ | kṛkalaḥ kṣutkaraḥ | devadatto jṛmbhaṇakaraḥ | dhanañjayaḥ poṣaṇakaraḥ || 85||

Topic 86

एतेषां प्राणादिषु अन्तर्भावात् प्राणादयः पञ्चैवेति केचित् ॥८६॥

eteṣāṁ prāṇādiṣu antarbhāvāt prāṇādayaḥ pañcaiveti kecit ||86||

Topic 87

एतत्प्राणादि पञ्चकम् आकाशादिगत रजोंशेभ्य: मिलितेभ्य उत्पद्यते ॥ ८७॥

etatprāṇādi pañcakam ākāśādigata rajoṁśebhya militebhya utpadyate || 87||

Topic 88

इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति । अस्य क्रियात्मकत्वेन रजोंश कार्यत्वम् ॥ ८८॥

idaṁ prāṇādipañcakaṁ karmendriyaiḥ sahitaṁ sat prāṇamayakośo bhavati | asya kriyātmakatvena rajoṁśa kāryatvam || 88||

Topic 89

**एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्यरूपः । योग्यत्वात् एवम् एतेषां विभाग इति वर्णयन्ति । एतत् कोशत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते ॥ ८९॥**

eteṣu kośeṣu madhye vijñānamayo jñānaśaktimān kartṛrūpaḥ | manomaya icchāśaktimān karaṇarūpaḥ | prāṇamayaḥ kriyāśaktimān kāryarūpaḥ | yogyatvāt evam eteṣāṁ vibhāga iti varṇayanti | etat kośatrayaṁ militaṁ sat sūkṣmaśarīramityucyate || 89||

## Topic 90

अत्रापि अखिल सूक्ष्मशरीरम् एकबुद्धि विषयतया वनवत् जलाशयवद्वा

समष्टिः अनेकबुद्धि विषयतया वृक्षवत् जलवद्वा व्यष्टिरपि भवति ॥ ९० ॥

atrāpi akhila sūkṣmaśarīram ekabuddhi viṣayatayā vanavat jalāśayavadvā samaṣṭi anekabuddhi viṣayatayā vṛkṣavat jalavadvā vyaṣṭirapi bhavati || 90||

## Topic 91

एतत् समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते

सर्वत्रा अनुस्यूतत्वात् ज्ञानेच्छाक्रियाशक्तिमत् उपहितत्वाच्च ॥ ९१ ॥

etat samaṣṭyupahitaṁ caitanyaṁ sūtrātmā hiraṇyagarbhaḥ prāṇaścetyucyate sarvatrā anusyūtatvāt jñānecchākriyāśaktimat upahitatvācca || 91||

## Topic 92

अस्यैषा समष्टिः स्थूल प्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं  विज्ञानमयादि कोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नोऽतएव स्थूल प्रपञ्चलयस्थानमिति चोच्यते ॥ ९२॥

asyaiṣā samaṣṭiḥ sthūla prapañcāpekṣayā sūkṣmatvātsūkṣmaśarīraṁ vijñānamayādi kośatrayaṁ jāgradvāsanāmayatvāt svapno'taeva sthūla prapañcalayasthānamiti cocyate || 92||

## Topic 93

एतत् व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तः करणोपहितत्वात् ॥ ९३॥

etat vyaṣṭyupahitaṁ caitanyaṁ taijaso bhavati tejomayāntaḥ karaṇopahitatvāt || 93||

## Topic 94

अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादि कोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः अतएव स्थूलशरीर लयस्थानमिति चोच्यते ॥ ९४॥

asyāpīyaṁ vyaṣṭiḥ sthūlaśarīrāpekṣayā sūkṣmatvāditi hetoreva sūkṣmaśarīraṁ vijñānamayādi kośatrayaṁ jāgradvāsanāmayatvāt svapnaḥ ataeva sthūlaśarīra layasthānamiti cocyate || 94||

## Topic 95

एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयान् अनुभवतः ``प्रविविक्तभुक् तैजसः (माण्डू उ ३) इत्यादि: ” ॥ ९५॥

etau sūtrātmataijasau tadānīṁ manovṛttibhiḥ sūkṣmaviṣayān anubhavataḥ praviviktabhuk taijasaḥ ityādiśruteḥ || 95||

## Topic 96

अत्रापि समष्टिव्यष्ट्योः तदुपहितसूत्रात्मतैजसयोः वनवृक्षवत् तदवच्छिन्नाकाशवच्च जलाशयजलवत् तद्गतप्रतिबिम्ब आकाशवच्चाभेदः ॥ ९६॥

atrāpi samaṣṭivyaṣṭyo tadupahitasūtrātmataijasayo vanavṛkṣavat tadavacchinnākāśavacca jalāśayajalavat tadgatapratibimba ākāśavaccābhedaḥ || 96||

## Topic 97

एवं सूक्ष्मशरीरोत्पत्तिः ॥ ९७॥

evaṁ sūkṣmaśarīrotpattiḥ || 97||

## Topic 98

स्थूलभूतानि तु पञ्चीकृतानि ॥ ९८॥

sthūlabhūtāni tu pañcīkṛtāni || 98||

Topic 99

पञ्चीकरणं तु आकाशादि पञ्चसु एकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीय अर्ध भाग परित्यागेन भागान्तरेषु योजनम् ॥ ९९॥

pañcīkaraṇaṁ tu ākāśādi pañcasu ekaikaṁ dvidhā samaṁ vibhajya teṣu daśasu bhāgeṣu prāthamikān pañcabhāgān pratyekaṁ caturdhā samaṁ vibhajya teṣāṁ caturṇāṁ bhāgānāṁ svasvadvitīya ardha bhāga parityāgena bhāgāntareṣu yojanam || 99||

Topic 100

तदुक्तम् -

``द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वेतरद्वितीयांशैः योजनात्पञ्च पञ्चते ॥"

इति ॥ ॥ १००॥

taduktam -

dvidhā vidhāya caikaikaṁ caturdhā prathamaṁ punaḥ ||

svasvetaradvitīyāṁśai yojanātpañca pañcate || iti || || 100||

## Topic 101

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करण श्रुतेः पञ्चीकरणस्यापि उपलक्षणत्वात् ॥ १०१॥

asyāprāmāṇyaṁ nāśaṅkanīyaṁ trivṛtkaraṇa śruteḥ pañcīkaraṇasyāpi upalakṣaṇatvāt || 101||

## Topic 102

पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च ``वैशेष्यात्तु तद्वादः तद्वादः'' (ब्र सू २.४.२२)

इति न्यायेन आकाशादि व्यपदेशः सम्भवति ॥ १०२॥

pañcānāṁ pañcātmakatve samāne'pi teṣu ca vaiśeṣyāttu tadvādaḥ tadvādaḥ iti nyāyena ākāśādi vyapadeśaḥ sambhavati || 102||

## Topic 103

तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्द स्पर्शौ अग्नौ शब्दस्पर्शरूपाणी अप्सु शब्दस्पर्शरूप रसाः पृथिव्यां शब्दस्पर्शरूपरस गन्धाश्च ॥ १०३॥

tadānīmākāśe śabdo'bhivyajyate vāyau śabda sparśau agnau śabdasparśarūpāṇī apsu śabdasparśarūpa rasāḥ pṛthivyāṁ śabdasparśarūparasa gandhāśca || 103||

## Topic 104

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वः महर्जनस्तपः सत्यमिति एतन्नामकानाम् उपर्युपरि विद्यमानानाम् अतल वितल सुतल रसातल तलातल महातल पातालनामकानाम् अधोऽधोविद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गत चतुर्विधस्थूलशरीराणां तदुचितानाम् अन्नपानादीनां च उत्पत्तिर्भवति ॥ १०४॥

etebhyaḥ pañcīkṛtebhyo bhūtebhyo bhūrbhuvaḥsva maharjanastapaḥ satyamiti etannāmakānām uparyupari vidyamānānām atala vitala sutala rasātala talātala mahātala pātālanāmakānām adho'dhovidyamānānāṁ lokānāṁ

brahmāṇḍasya tadantargata caturvidhasthūlaśarīrāṇāṁ taducitānām annapānādīnāṁ ca utpattirbhavati || 104||

**Topic 105**

**चतुर्विधशरीराणि तु जरायुजाण्डज स्वेदजोद्भिज् आख्यानि ॥ १०५॥**

caturvidhaśarīrāṇi tu jarāyujāṇḍaja svedajodbhij ākhyāni || 105||

**Topic 106**

**जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि ॥ १०६॥**

jarāyujāni jarāyubhyo jātāni manuṣyapaśvādīni || 106||

**Topic 107**

**अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादीनि ॥ १०७॥**

aṇḍajāni aṇḍebhyo jātāni pakṣipannagādīni || 107||

||

Topic 108

स्वेदजानि स्वेदेभ्यो जातानि यूकमशकादीनि ॥ १०८॥

svedajāni svedebhyo jātāni yūkamaśakādīni || 108||

Topic 109

उद्भिज्जानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि ॥ १०९॥

udbhijjāni bhūmimudbhidya jātāni latāvṛkṣādīni || 109||

Topic 110

अत्रापि चतुर्विध सकल स्थूल शरीरम् एकानेक बुद्धिविषयतया वनवत् जलाशयवद्वा समष्टि: वृक्षवत् जलवद्वा व्यष्टि: अपि भवति ॥ ११०॥

atrāpi caturvidha sakala sthūla śarīram ekāneka buddhiviṣayatayā vanavat jalāśayavadvā samaṣṭi vṛkṣavat jalavadvā vyaṣṭi api bhavati || 110||

## Topic 111

एतत् समष्टि उपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनर अभिमानित्वात् विविधं राजमानत्वात् च ॥ १११॥

etat samaṣṭi upahitaṁ caitanyaṁ vaiśvānaro virāḍityucyate sarvanara abhimānitvāt vividhaṁ rājamānatvāt ca || 111||

## Topic 112

अस्यैषा समष्टिः स्थूलशरीरं अन्नविकारत्वात् अन्नमयकोशः स्थूलभोगायतनत्वात् च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते ॥ ११२॥

asyaiṣā samaṣṭiḥ sthūlaśarīraṁ annavikāratvāt annamayakośaḥ sthūlabhogāyatanatvāt ca sthūlaśarīraṁ jāgraditi ca vyapadiśyate || 112||

## Topic 113

एतेत् व्यष्टि उपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीर अभिमानं अपरित्यज्य

स्थूलशरीरादि प्रविष्टत्वात् ॥ ११३॥

etet vyaṣṭi upahitaṁ caitanyaṁ viśva ityucyate sūkṣmaśarīra abhimānaṁ aparityajya sthūlaśarīrādi praviṣṭatvāt || 113||

## Topic 114

अस्याप्येषा व्यष्टिः स्थूलशरीरं अन्नविकारत्वादेव हेतोः अन्नमयकोशो जाग्रदिति चोच्यते ॥ ११४॥

asyāpyeṣā vyaṣṭiḥ sthūlaśarīraṁ annavikāratvādeva heto annamayakośo jāgraditi cocyate || 114||

Topic 115

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुण अश्विभिः क्रमान्  नियन्त्रितेन श्रोत्रादीन्द्रिय पञ्चकेन क्रमान् शब्दस्पर्श रूप रस गन्धान् अग्नि इन्द्रोपेन्द्र यम प्रजापतिभिः क्रमान् नियन्त्रितेन  वागादीन्द्रियपञ्चकेन क्रमात् वचनादानगमन विसर्गानन्दान् चन्द्रचतुर्मुख शङ्कराच्युतैः क्रमान् नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येन अन्तरेन्द्रियचतुष्केण

क्रमात्सङ्कल्पनिश्चय अहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतः ``जागरितस्थानो बहिःप्रज्ञः”  (माण्डू उ ३) इत्यादिश्रुतेः ॥ ११५॥

tadānīmetau viśvavaiśvānarau digvātārkavaruṇa aśvibhiḥ kramān  niyantritena śrotrādīndriya pañcakena kramān śabdasparśa rūpa rasa gandhān agni indropendra yama prajāpatibhiḥ kramān niyantritena vāgādīndriyapañcakena kramāt vacanādānagamana visargānandān candracaturmukha śaṅkarācyutaiḥ kramān niyantritena manobuddhyahaṅkāracittākhyena antarendriyacatuṣkeṇa

kramātsaṅkalpaniścaya ahaṅkāryacaittāṁśca sarvānetān sthūlaviṣayānanubhavataḥ jāgaritasthāno bahiḥprajñaḥ ityādiśruteḥ || 115||

**Topic 116**

**अत्राप्यनयोः स्थूल व्यष्टिसमष्ट्यो स्तदुपहित विश्ववैश्वानरयोश्चवनवृक्षवत् तदवच्छिन्न आकाशवच्च जलाशयजलवत् तद्गतप्रतिबिम्ब आकाशवच्च पूर्ववदभेदः ॥ ११६॥**

atrāpyanayoḥ sthūla vyaṣṭisamaṣṭyo stadupahita viśvavaiśvānarayoścavanavṛkṣavat tadavacchinna ākāśavacca jalāśayajalavat tadgatapratibimba ākāśavacca pūrvavadabhedaḥ || 116||

**Topic 117**

**एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ॥ ११७॥**

evaṁ pañcīkṛtapañcabhūtebhyaḥ sthūlaprapañcotpattiḥ || 117||

Topic 118

एतेषां स्थूलसूक्ष्मकारणप्रपञ्चा नामपि समष्टिरेको महान्प्रपञ्चो भवति यथा अवान्तर वनानां समष्टि: एकं महद्वनं भवति यथा वा अवान्तर जलाशयानां समष्टिरेको महान् जलाशयः ॥ ११८॥

eteṣāṁ sthūlasūkṣamakāraṇaprapañcā nāmapi samaṣṭireko mahānprapañco bhavati yathā avāntara vanānāṁ samaṣṭi ekaṁ mahadvanaṁ bhavati yathā vā avāntara jalāśayānāṁ samaṣṭireko mahān jalāśayaḥ ||118||

Topic 119

एतदुपहितं वैश्वानरादि ईश्वरपर्यन्तं चैतन्यम् अपि अवान्तर वनावच्छिन्न आकाशवत् अवान्तर जलाशयगत प्रतिबिम्ब आकाशवत् च एकमेव ॥ ११९॥

etadupahitaṁ vaiśvānarādi īśvaraparyantaṁ caitanyam api avāntara vanāvacchinna ākāśavat avāntara jalāśayagata pratibimba ākāśavat ca ekameva || 119||

Topic 120

आभ्यां महाप्रपञ्च तदुपहितचैतन्याभ्यां तप्ताय: पिण्डवत् अविविक्तं सत् अनुपहितं चैतन्यं ``सर्वं खल्विदं ब्रह्म" इति (छान्द् उ ३.१४.१) महा वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति ॥ १२०॥

ābhyāṁ mahāprapañca tadupahitacaitanyābhyāṁ taptāyah piṇḍavat aviviktaṁ sat anupahitaṁ caitanyaṁ sarvaṁ khalvidaṁ brahma iti mahā vākyasya vācyaṁ bhavati viviktaṁ sallakṣyamapi bhavati || 120||

Topic 121

एवं वस्तुनि अवस्त्वारोप: अध्यारोपः सामान्येन प्रदर्शितः ॥ १२१॥

evaṁ vastuni avastvāropa adhyāropaḥ sāmānyena pradarśitaḥ || 121||

## Chapter 3

### Topic 122

इदानीं प्रत्यगात्मनि इदमिदम् अयमयम् आरोपयति इति विशेषत उच्यते ॥ १२२॥

idānīṁ pratyagātmani idamidam ayamayam āropayati iti viśeṣata ucyate || 122||

### Topic 123

अतिप्राकृतस्तु ``आत्मा वै जायते पुत्रः" इत्यादिश्रुतेः स्वस्मिन्निव पुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे च अहमेव पुष्टो नष्टश्च इत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ १२३॥

atiprākṛtastu ātmā vai jāyate putraḥ ityādiśruteḥ svasminniva putre'pi premadarśanāt putre puṣṭe naṣṭe ca ahameva puṣṭo naṣṭaśca ityādyanubhavācca putra ātmeti vadati || 123||

**Topic 124**

**चार्वाकस्तु ``स वा एष पुरुषोऽन्नरसमयः” (तै उ २.१.१) इत्यादिश्रुतेः प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहं इत्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ १२४॥**

cārvākastu sa vā eṣa puruṣo'nnarasamayaḥ ityādiśruteḥ pradīptagṛhāt svaputraṁ parityajyāpi svasya nirgamadarśanāt sthūlo'haṁ kṛśo'haṁ ityādyanubhavācca sthūlaśarīramātmeti vadati || 124||

## Topic 125

अपरश्चार्वाकः ``ते ह प्राणाः प्रजापतिं पितरमेत्योचुः" (छा उ ५.१.७) इत्यादिश्रुतेः इन्द्रियाणां अभावे शरीरचलन अभावात् काणोऽहं बधिरोऽहं इत्याद्यनुभवाच्च इन्द्रियाणि आत्मेति वदति ॥ १२५॥

aparaścārvākaḥ te ha prāṇāḥ prajāpatiṁ pitarametyocuḥ ityādiśrute indriyāṇāṁ abhāve śarīracalana abhāvāt kāṇo'haṁ badhiro'haṁ ityādyanubhavācca indriyāṇi ātmeti vadati || 125||

## Topic 126

अपरश्चार्वाकः ``अन्योऽन्तर आत्मा प्राणमयः" (तै उ २.२.१) इत्यादिश्रुतेः प्राणाभाव इन्द्रियादि चलनायोगात् अहमशनायावान् अहंपिपासावान् इत्यादि अनुभवाच्च प्राण आत्मेति वदति ॥ १२६॥

aparaścārvākaḥ anyo'ntara ātmā prāṇamayaḥityādiśruteḥ prāṇābhāva indriyādi calanāyogāt ahamaśanāyāvān ahaṁpipāsāvān ityādi anubhavācca prāṇa ātmeti vadati || 126||

## Topic 127

अन्यस्तु चार्वाकः ``अन्योऽन्तर आत्मा मनोमयः” (तै उ २.३.१) इत्यादिश्रुतेः मनसि सुप्ते प्राणादे अभावात् अहं सङ्कल्पवानहं विकल्पवान् इत्याद्यनुभवाच्च मन आत्मेति वदति ॥ १२७॥

anyastu cārvākaḥ anyo'ntara ātmā manomayaḥityādiśrute manasi supte prāṇāde abhāvāt ahaṁ saṅkalpavānahaṁ vikalpavān ityādyanubhavācca mana ātmeti vadati || 127||

## Topic 128

बौद्धस्तु ``अन्योऽन्तर आत्मा विज्ञानमयः” (तै उ २.४.१) इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावात् अहं कर्ताहं भोक्ता इत्यादि अनुभवाच्च बुद्धिरात्मेति वदति ॥ १२८॥

bauddhastu anyo'ntara ātmā vijñānamayaḥityādiśruteḥ karturabhāve karaṇasya śaktyabhāvāt ahaṁ kartāhaṁ bhoktā ityādi anubhavācca buddhirātmeti vadati || 128||

Topic 129

प्राभाकर तार्किकौ तु ``अन्योऽन्तर आत्मानन्दमयः'' (तै उ २.५.१) इत्यादिश्रुतेः बुद्ध्यादीनाम् अज्ञाने लयदर्शनात् अहमज्ञः अहमज्ञानि इत्यादि अनुभवाच्च अज्ञानमात्मेति वदतः ॥ १२९॥

prābhākara tārkikau tu anyo'ntara ātmānandamayaḥ tai u 251 ityādiśrute buddhyādīnām ajñāne layadarśanāt ahamajñaḥ ahamajñāni ityādi anubhavācca ajñānamātmeti vadataḥ || 129||

Topic 130

भाट्टस्तु ``प्रज्ञानघन एवानन्दमयः'' (माण्डू उ ५) इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाश सद्भावात् मामहं न जानामि इत्यादि अनुभवाच्च अज्ञानोपहितं चैतन्यम् आत्मेति वदति ॥ १३०॥

bhāṭṭastu prajñānaghana evānandamayaḥ ityādiśruteḥ suṣuptau prakāśāprakāśa sadbhāvāt māmahaṁ na jānāmi

ityādi anubhavācca ajñānopahitaṁ caitanyam ātmeti vadati ||
130||

**Topic 131**

अपरो बौद्धः ``असदेवेदमग्र आसीत्'' (छा उ ६.२.१) इत्यादिश्रुतेः सुषुप्तौ सर्वाभावात् अहं सुषुप्तौ नासमिति उत्थितस्य स्वाभाव परामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ १३१॥

aparo bauddhaḥ asadevedamagra āsīt ityādiśruteḥ suṣuptau sarvābhāvāt ahaṁ suṣuptau nāsamiti utthitasya svābhāva parāmarśaviṣayānubhavācca śūnyamātmeti vadati || 131||

**Topic 132**

एतेषां पुत्रादीनाम् अनात्मत्वम् उच्यते ॥ १३२॥

eteṣāṁ putrādīnām anātmatvam ucyate || 132||

## Topic 133

एतैः अतिप्राकृतादि वादिभिः उक्तेषु श्रुतियुक्त्यनुभव आभासेषु पूर्वपूर्वोक्त श्रुति युक्त्यनुभव आभासानाम् उत्तरोत्तर श्रुति युक्त्यनुभवाभासैः आत्मत्व बाधदर्शनात् पुत्रादीनाम् अनात्मत्वं स्पष्टमेव ॥ १३३॥

etai atiprākṛtādi vādibhi ukteṣu śrutiyuktyanubhava ābhāseṣu pūrvapūrvokta śruti yuktyanubhava ābhāsānām uttarottara śruti yuktyanubhavābhāsai ātmatva bādhadarśanāt putrādīnām anātmatvaṁ spaṣṭameva || 133||

Topic 134

**किञ्च प्रत्यगस्थूल: अचक्षुरप्राण: अमना अकर्ता चैतन्यं चिन्मात्रं सत् इत्यादि प्रबल श्रुति विरोधात् अस्य पुत्रादि शून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवत् अनित्यत्वात् अहं ब्रह्मेति विद्वदनुभव प्राबल्याच्च तत्तत् श्रुतियुक्त्यनुभव आभासानां बाधितत्वादपि पुत्रादि शून्यपर्यन्तम् अखिलम् अनात्मैव ॥ १३४॥**

kiñca pratyagasthūla acakṣuraprāṇa amanā akartā caitanyaṁ cinmātraṁ sat ityādi prabala śruti virodhāt asya putrādi śūnyaparyantasya jaḍasya caitanyabhāsyatvena ghaṭādivat anityatvāt ahaṁ brahmeti vidvadanubhava prābalyācca tattat śrutiyuktyanubhava ābhāsānāṁ bādhitatvādapi putrādi śūnyaparyantam akhilam anātmaiva || 134||

**Topic 135**

अतस्तत्तद्भासकं नित्य शुद्धबुद्धमुक्त सत्य स्वभावं प्रतयक् चैतन्यमेव आत्मवस्तु इति वेदान्तविद्वदनुभवः ॥ १३५॥

atastattadbhāsakaṁ nitya śuddhabuddhamukta satya svabhāvaṁ pratayak caitanyameva ātmavastu iti vedāntavidvadanubhavaḥ || 135||

**Topic 136**

एवमध्यारोपः ॥ १३६॥

evamadhyāropaḥ || 136||

**Chapter 4**

## Topic 137

अपवादो नाम रज्जु विवर्तस्य सर्पस्य रज्जुमात्रत्ववत्  वस्तु विवर्तस्य अवस्तुनः अज्ञानादेः

प्रपञ्चस्य वस्तुमात्रत्वम् ॥ १३७॥

apavādo nāma rajju vivartasya sarpasya rajjumātratvavat

vastu vivartasya avastuna ajñānādeḥ

prapañcasya vastumātratvam || 137||

**Topic 138**

तदुक्तम् -

``सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः । अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः ''

इति ॥ १३८॥

taduktam -

satattvato'nyathāprathā vikāra ityudīritaḥ |

atattvato'nyathāprathā vivarta ityudīritaḥ iti || 138||

**Topic 139**

तथाहि एतत् भोगायतनं चतुर्विधसकल स्थूल शरीरजातं भोग्यरूप अन्नपानादिकम् एतदायतन भूत भूरादि चतुर्दश भुवनानि एतदायतनभूतं ब्रह्माण्डं च एतत्सर्वम् एतेषां कारणरूपं पञ्चीकृत भूतमात्रं भवति ॥ १३९॥

tathāhi etat bhogāyatanaṁ caturvidhasakala sthūla śarīrajātaṁ bhogyarūpa annapānādikam etadāyatana bhūta bhūrādi caturdaśa bhuvanāni etadāyatanabhūtaṁ brahmāṇḍaṁ ca etatsarvam eteṣāṁ kāraṇarūpaṁ pañcīkṛta bhūtamātraṁ bhavati || 139||

## Topic 140

एतानि शब्दादि विषय सहितानि पञ्चीकृतानि भूतानि सूक्ष्म शरीरजातं च एतत्सर्वमेतेषां कारणरूप अपञ्चीकृतभूतमात्रं भवति ॥ १४० ॥

etāni śabdādi viṣaya sahitāni pañcīkṛtāni bhūtāni sūkṣma śarīrajātaṁ ca etatsarvameteṣāṁ kāraṇarūpa apañcīkṛtabhūtamātraṁ bhavati || 140||

## Topic 141

एतानि सत्त्वादि गुणसहितानि अपञ्चीकृतानि उत्पत्ति व्युत्क्रमेण एतत्कारणभूत अज्ञानोपहित चैतन्यमात्रं भवति ॥ १४१ ॥

etāni sattvādi guṇasahitāni apañcīkṛtāni utpatti vyutkrameṇa etatkāraṇabhūta ajñānopahita caitanyamātraṁ bhavati || 14

## Topic 142

एतत् अज्ञानं अज्ञानोपहितं चैतन्यं च ईश्वरादिकम् एतदाधारभूत अनुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ॥ १४२॥

etat ajñānaṁ ajñānopahitaṁ caitanyaṁ ca īśvarādikam etadādhārabhūta anupahitacaitanyarūpaṁ turīyaṁ brahmamātraṁ bhavati || 142||

## Topic 143

आभ्यां अध्यारोप अपवादाभ्यां तत्त्वम्पदार्थ शोधनम् अपि सिद्धं भवति ॥ १४३॥

ābhyāṁ adhyāropa apavādābhyāṁ tattvampadārthaśodhanam api siddhaṁ bhavati || 143||

## Topic 144

तथाहि – अज्ञानादि समष्टिः एतदुपहितं सर्वज्ञत्वादि विशिष्टं चैतन्यं एतदनुपहितं च एतत्त्रयं तप्तायः पिण्डवत् एकत्वेन अवभासमानं तत्पदवाच्यार्थो भवति ॥ १४४॥

tathāhi  ajñānādi samaṣṭi etadupahitaṁ sarvajñatvādi viśiṣṭaṁ caitanyaṁ etadanupahitaṁ ca etattrayaṁ taptāyaḥ piṇḍavat ekatvena avabhāsamānaṁ tatpadavācyārtho bhavati || 144||

## Topic 145

एतदुपाधि उपहित आधारभूतं अनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति ॥ १४५॥

etadupādhi upahita ādhārabhūtaṁ anupahitaṁ caitanyaṁ tatpadalakṣyārtho bhavati || 145||

### Topic 146

**अज्ञानादि व्यष्टिः एतदुपहित अल्पज्ञत्वादि विशिष्ट चैतन्यं एतदनुपहितं च एतत्त्रयं तप्तायः पिण्डवत् एकत्वेन अवभासमानं त्वम्पदवाच्यार्थो भवति ॥ १४६॥**

ajñānādi vyaṣṭi etadupahita alpajñatvādi viśiṣṭa caitanyaṁ etadanupahitaṁ ca etattrayaṁ taptāyaḥ piṇḍavat ekatvena avabhāsamānaṁ tvampadavācyārtho bhavati || 146||

### Topic 147

**एतदुपाधि उपहित आधारभूतं अनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ॥ १४७॥**

etadupādhi upahita ādhārabhūtaṁ anupahitaṁ pratyagānandaṁ turīyaṁ caitanyaṁ tvampadalakṣyārtho bhavati || 147||

Topic 148

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसि महावाक्यं सम्बन्धत्रयेण अखण्डार्थ बोधकं भवति ॥ १४८॥

atha mahāvākyārtho varṇyate | idaṁ tattvamasi mahāvākyaṁ sambandhatrayeṇa akhaṇḍārtha bodhakaṁ bhavati || 148||

Topic 149

सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयो: विशेषण विशेष्य भावः प्रत्यगात्म लक्षणयो: लक्ष्य लक्षणभावश्चेति ॥ १४९॥

sambandhatrayaṁ nāma padayoḥ sāmānādhikaraṇyaṁ padārthayo viśeṣaṇa viśeṣya bhāvaḥ pratyagātma lakṣaṇayo lakṣya lakṣaṇabhāvaśceti || 149||

Topic 150

तदुक्तम् -

``सामानाधिकरण्यं च विशेषण विशेष्यता । लक्ष्यलक्षण सम्बन्धः पदार्थ प्रत्यगात्मनाम् ॥'' इति ॥ १५०॥

taduktam -

sāmānādhikaraṇyaṁ ca viśeṣaṇa viśeṣyatā | lakṣyalakṣaṇa sambandhaḥ padārtha pratyagātmanām ||iti || 150||

Topic 151

सामानाधिकरण्य सम्बन्धः तावत् यथा सोऽयं देवदत्त इति अस्मिन्वाक्ये तत्काल विशिष्ट देवदत्तवाचक सशब्दस्य एतत्काल विशिष्ट देवदत्तवाचक अयंशब्दस्य च एकस्मिन्पिण्डे तात्पर्यसम्बन्धः । तथा च तत्त्वमसीति वाक्येऽपि परोक्षत्वादि विशिष्ट चैतन्यवाचक तत्पदस्य अपरोक्षत्वादि विशिष्ट चैतन्यवाचक त्वम्पदस्य च एकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः ॥ १५१॥

sāmānādhikaraṇya sambandha tāvat yathā so'yaṁ devadatta iti asminvākye tatkāla viśiṣṭa devadattavācaka saśabdasya etatkāla viśiṣṭa devadattavācaka ayaṁśabdasya ca

ekasminpiṇḍe tātparyasambandhaḥ | tathā ca tattvamasīti vākye'pi parokṣatvādi viśiṣṭa caitanyavācaka tatpadasya aparokṣatvādi viśiṣṭa caitanyavācaka tvampadasya ca ekasmiṁścaitanye tātparyasambandhaḥ || 151||

## Topic 152

विशेषण विशेष्यभाव सम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थ तत्काल विशिष्ट देवदत्तस्य अयंशब्दार्थ एतत्काल विशिष्ट देवदत्तस्य च अन्योन्य भेद व्यावर्तकतया विशेषण विशेष्यभावः । तथात्रापि वाक्ये तत्पदार्थ परोक्षत्वादि विशिष्टचैतन्यस्य त्वम्पदार्था अपरोक्षत्वादि विशिष्टचैतन्यस्य च अन्योन्य भेद व्यावर्तकतया विशेषण विशेष्यभावः ॥ १५२॥

viśeṣaṇa viśeṣyabhāva sambandhastu yathā tatraiva vākye saśabdārtha tatkāla viśiṣṭa devadattasya ayaṁśabdārtha etatkāla viśiṣṭa devadattasya ca anyonya bheda vyāvartakatayā viśeṣaṇa viśeṣyabhāvaḥ | tathātrāpi vākye tatpadārtha parokṣatvādi viśiṣṭacaitanyasya tvampadārthā aparokṣatvādi

viśiṣṭacaitanyasya ca anyonya bheda vyāvartakatayā viśeṣaṇa viśeṣyabhāvaḥ || 152||

Topic 153

लक्ष्य लक्षण सम्बन्धस्तु यथा तत्रैव सशब्दायंशब्दयोः तदर्थयोः वा विरुद्ध तत्काल एतत्काल विशिष्टत्व परित्यागेन अविरुद्ध देवदत्तेन सह लक्ष्य लक्षणभावः ।तथात्रापि वाक्ये तत्त्वम्पदयोः तदर्थयोः वा विरुद्ध परोक्षत्व अपरोक्षत्वादि विशिष्टत्व परित्यागेन अविरुद्ध चैतन्येन सह लक्ष्य लक्षणभावः ॥ १५३॥

lakṣya lakṣaṇa sambandhastu yathā tatraiva saśabdāyaṁśabdayoḥ tadarthayoḥ vā viruddha tatkāla etatkāla viśiṣṭatva parityāgena aviruddha devadattena saha lakṣya lakṣaṇabhāvaḥ |tathātrāpi vākye tattvampadayoḥ tadarthayoḥ vā viruddha parokṣatva aparokṣatvādi viśiṣṭatva parityāgena aviruddha caitanyena saha lakṣya lakṣaṇabhāvaḥ || 153||

Topic 154

इयमेव भागलक्षणेत्युच्यते ॥ १५४॥

iyameva bhāgalakṣaṇetyucyate || 154||

Topic 155

अस्मिन्वाक्ये नीलं उत्पलमिति वाक्यवत् वाक्यार्थो न सङ्गच्छते ॥ १५५॥

asminvākye nīlaṁ utpalamiti vākyavat vākyārtho na saṅgacchate || 155||

Topic 156

तत्र तु नीलपदार्थ नीलगुणस्य उत्पलपदार्थ उत्पलद्रव्यस्य च शौक्ल्यपटादि भेद व्यावर्तकतया अन्योन्य विशेषणविशेष्य रूप संसर्गस्य अन्यतर विशिष्टस्य अन्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तर विरोधाभावात् तद्वाक्यार्थः सङ्गच्छते ॥ १५६॥

tatra tu nīlapadārtha nīlaguṇasya utpalapadārtha utpaladravyasya ca śauklyapaṭādi bheda vyāvartakatayā

anyonya viśeṣaṇaviśeṣya rūpa saṁsargasya anyatara viśiṣṭasya anyatarasya tadaikyasya vā vākyārthatvāṅgīkāre pramāṇāntara virodhābhāvāt tadvākyārthaḥ saṅgacchate || 156||

**Topic 157**

अत्र तु तत्पदार्थ परोक्षत्वादि विशिष्ट चैतन्यस्य त्वम्पदार्थ अपरोक्षत्वादि विशिष्ट चैतन्यस्य च अन्योन्य भेद व्यावर्तकतया विशेषण विशेष्यभाव संसर्गस्य अन्यतर विशिष्टस्य अन्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादि प्रमाण विरोधात् वाक्यार्थो न सङ्गच्छते ॥ १५७॥

atra tu tatpadārtha parokṣatvādi viśiṣṭa caitanyasya tvampadārtha aparokṣatvādi viśiṣṭa caitanyasya ca anyonya bheda vyāvartakatayā viśeṣaṇa viśeṣyabhāva saṁsargasya anyatara viśiṣṭasya anyatarasya tadaikyasya vā vākyārthatvāṅgīkāre pratyakṣādi pramāṇa virodhāt vākyārtho na saṅgacchate || 157||

Topic 158

तदुक्तम् -

``संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।

अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥"

इति (पञ्चदशी ७.७५) ॥ १५८॥

taduktam -

saṁsargo vā viśiṣṭo vā vākyārtho nātra sammataḥ |

akhaṇḍaikarasatvena vākyārtho viduṣāṁ mataḥ ||| 158||

Topic 159

अत्र गङ्गायां घोषः प्रतिवसति इति वाक्यवत् जहल्लक्षणापि न सङ्गच्छते ॥ १५९॥

atra gaṅgāyāṁ ghoṣaḥ prativasati iti vākyavat jahallakṣaṇāpi na saṅgacchate || 159||

## Topic 160

तत्र तु गङ्गाघोषयोः आधार आधेयभाव लक्षणस्य वाक्यार्थस्य अशेषतो विरुद्धत्वात् वाक्यार्थम् अशेषतः परित्यज्य तत्सम्बन्धि तीरलक्षणाया युक्तत्वात् जहल्लक्षणा सङ्गच्छते ॥ १६० ॥

tatra tu gaṅgāghoṣayo ādhāra ādheyabhāva lakṣaṇasya vākyārthasya aśeṣato viruddhatvāt vākyārtham aśeṣataḥ parityajya tatsambandhi tīralakṣaṇāyā yuktatvāt jahallakṣaṇā saṅgacchate || 160||

## Topic 161

अत्र तु परोक्ष अपरोक्ष चैतन्य एकत्व लक्षणस्य वाक्यार्थस्य भागमात्रे विरोधात् भागान्तरमपि परित्यज्य अन्यलक्षणाया अयुक्तत्वात् जहल्लक्षणा न सङ्गच्छते ॥ १६१ ॥

atra tu parokṣa aparokṣa caitanya ekatva lakṣaṇasya vākyārthasya bhāgamātre virodhāt bhāgāntaramapi parityajya anyalakṣaṇāyā ayuktatvāt jahallakṣaṇā na saṅgacchate || 161||

Topic 162

न च गङ्गापदं स्वार्थ परित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वम्पदं वा स्वार्थ परित्यागेन त्वम्पदार्थं तत्पदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न सङ्गच्छत इति वाच्यम् ॥ १६२॥

na ca gaṅgāpadaṁ svārtha parityāgena tīrapadārthaṁ yathā lakṣayati tathā tatpadaṁ tvampadaṁ vā svārtha parityāgena tvampadārthaṁ tatpadārthaṁ vā lakṣayatu ataḥ kuto jahallakṣaṇā na saṅgacchata iti vācyam || 162||

Topic 163

तत्र तीरपदा श्रवणेन तदर्था प्रतीतौ लक्षणया तत्प्रतीति अपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थ प्रतीतौ लक्षणया पुनः अन्यतर पदेन अन्यतर पदार्थ प्रतीति अपेक्षाभावात् ॥ १६३॥

tatra tīrapadā śravaṇena tadarthā pratītau lakṣaṇayā tatpratīti apekṣāyāmapi tattvampadayoḥ śrūyamāṇatvena tadartha pratītau lakṣaṇayā puna anyatara padena anyatara padārtha pratīti apekṣābhāvāt || 163||

## Topic 164

**अत्र शोणो धावतीति वाक्यवत् अजहल्लक्षणापि न सम्भवति ॥ १६४॥**

atra śoṇo dhāvatīti vākyavat ajahallakṣaṇāpi na sambhavati || 164||

## Topic 165

**तत्र शोणगुण गमन लक्षणस्य वाक्यार्थस्य विरुद्धत्वात् तत् अपरित्यागेन तदाश्रय अश्वादिलक्षणया तद्विरोध परिहार सम्भवात् अजहल्लक्षणा सम्भवति ॥ १६५॥**

tatra śoṇaguṇa gamana lakṣaṇasya vākyārthasya viruddhatvāt tat aparityāgena tadāśraya aśvādilakṣaṇayā tadvirodha parihāra sambhavāt ajahallakṣaṇā sambhavati || 165||

Topic 166

अत्र तु परोक्षत्वा अपरोक्षत्व आदि् विशिष्ट चैतन्य एकत्वस्य वाक्यार्थस्य विरुद्धत्वात् तत् अपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचित् अर्थस्य लक्षितत्वेऽपि तद्विरोध परिहार असम्भवात् अजहल्लक्षणा न सम्भवति इत्येव ॥ १६६ ॥

atra tu parokṣatvā aparokṣatva ādi viśiṣṭa caitanya ekatvasya vākyārthasya viruddhatvāt tat aparityāgena tatsambandhino yasya kasyacit arthasya lakṣitatve'pi tadvirodha parihāra asambhavāt ajahallakṣaṇā na sambhavati ityeva || 166||

Topic 167

न च तत्पदं त्वम्पदं वा स्वार्थ विरुद्ध अंश परित्यागेन अंशान्तर सहितं त्वम्पदार्थं तत्पदार्थं वा लक्षयतु अतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणं इति वाच्यम् ॥ १६७॥

na ca tatpadaṁ tvampadaṁ vā svārtha viruddha aṁśa parityāgena aṁśāntara sahitaṁ tvampadārthaṁ tatpadārthaṁ vā lakṣayatu ataḥ kathaṁ prakārāntareṇa bhāgalakṣaṇāṅgīkaraṇaṁ iti vācyam || 167||

Topic 168

एकेन पदेन स्वार्थांश पदार्थान्तर उभयलक्षणाया असम्भवात् पदान्तरेण तदर्थ प्रतीतौ लक्षणया पुनः तत्प्रति इति अपेक्षाभावात् च ॥ १६८॥

ekena padena svārthāṁśa padārthāntara ubhayalakṣaṇāyā asambhavāt padāntareṇa tadartha pratītau lakṣaṇayā puna tatprati iti apekṣābhāvāt ca || 168||

Topic 169

तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्काल एतत्काल विशिष्ट देवदत्त लक्षणस्य वाक्यार्थस्या अंशे विरोधात् विरुद्ध तत्काल एतत्काल विशिष्टांशं परित्यज्य अविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसि इति वाक्यं तदर्थो वा परोक्षत्व अपरोक्षत्वादि विशिष्ट चैतन्य एकत्व लक्षणस्य वाक्यार्थस्या अंशे विरोधात् विरुद्ध परोक्षत्व अपरोक्षत्व विशिष्टांशं परित्यज्य अविरुद्धमखण्ड चैतन्यमात्रं लक्षयतीति ॥ १६९॥

tasmādyathā so'yaṁ devadatta iti vākyaṁ tadartho vā tatkāla etatkāla viśiṣṭa devadatta lakṣaṇasya vākyārthasyā aṁśe virodhāt viruddha tatkāla etatkāla viśiṣṭāṁśaṁ parityajya aviruddhaṁ devadattāṁśamātraṁ lakṣayati tathā tattvamasi iti vākyaṁ tadartho vā parokṣatva aparokṣatvādi viśiṣṭa caitanya ekatva lakṣaṇasya vākyārthasyā aṁśe virodhāt viruddha parokṣatva aparokṣatva viśiṣṭāṁśaṁ parityajya aviruddhamakhaṇḍa caitanyamātraṁ lakṣayatīti || 169||

## Topic 170

अथाधुन अहं ब्रह्मास्मि  (बृ उ १.४.१०) इति अनुभव वाक्यार्थो वर्ण्यते ॥ १७०॥

athādhuna ahaṁ brahmāsmi   iti anubhava vākyārtho varṇyate || 170||

## Topic 171

एवमाचार्येण अध्यारोप अपवाद पुरः सरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येन अखण्डार्थे अवबोधिते अधिकारिण:  अहं नित्य शुद्ध बुद्ध मुक्त सत्य स्वभाव परमानन्द अनन्त अद्वयं ब्रह्मास्मि इति अखण्डाकारकारिता चित्तवृत्ति उदेति ॥ १७१॥

evamācāryeṇa adhyāropa apavāda puraḥ saraṁ tattvampadārthau śodhayitvā vākyena akhaṇḍārthe avabodhite adhikāriṇa  ahaṁ nitya śuddha buddha mukta satya svabhāva paramānanda ananta advayaṁ brahmāsmi iti akhaṇḍākārakāritā cittavṛtti udeti || 171||

Topic 172

सा तु चित्प्रतिबिम्ब सहिता सती प्रत्यक् अभिन्नमज्ञातं परम्ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते तदा पटकारणतन्तुदाहे पटदाहवत् अखिलकारण अज्ञाने बाधिते सति तत्कार्यस्य अखिलस्य बाधितत्वात् तदन्तर्भूत अखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति ॥ १७२॥

sā tu citpratibimba sahitā satī pratyak abhinnamajñātaṁ parambrahma viṣayīkṛtya tadgatājñānameva bādhate tadā paṭakāraṇatantudāhe paṭadāhavat akhilakāraṇa ajñāne bādhite sati tatkāryasya akhilasya bādhitatvāt tadantarbhūta akhaṇḍākārākāritā cittavṛttirapi bādhitā bhavati || 172||

## Topic 173

तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभा आदित्यप्रभावभासन असमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमान प्रत्यगभिन्न परब्रह्मा अवभासन अनर्हतया तेनाभिभूतं सत् स्वोपाधिभूत अखण्डवृत्तेर्बाधितत्वात् दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्न परब्रह्ममात्रं भवति ॥ १७३॥

tatra pratibimbitaṁ caitanyamapi yathā dīpaprabhā ādityaprabhāvabhāsana asamarthā satī tayābhibhūtā bhavati tathā svayamprakāśamāna pratyagabhinna parabrahmā avabhāsana anarhatayā tenābhibhūtaṁ sat svopādhibhūta akhaṇḍavṛtterbādhitatvāt darpaṇābhāve mukhapratibimbasya mukhamātratvavat pratyagabhinna parabrahmamātraṁ bhavati || 173||

Topic 174

एवं च सति ``मनसैवानुद्रष्टव्यम्'' (बृ. उ. ४.४.१९) ``यन्मनसा न मनुते'' (के. उ. १.५) इति अनयोः श्रुत्योः अविरोधः वृत्तिव्याप्यत्व अङ्गीकारेण फलव्याप्यत्व प्रतिषेध प्रतिपादनात् ॥ १७४॥

evaṁ ca sati manasaivānudraṣṭavyam yanmanasā na manute iti anayoḥ śrutyo avirodha vṛttivyāpyatva aṅgīkāreṇa phalavyāpyatva pratiṣedha pratipādanāt || 174||

Topic 175

तदुक्तम् -

``फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।

ब्रह्मण्य ज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ '' इति (पञ्चदशी) ॥ १७५॥

taduktam -

phalavyāpyatvamevāsya śāstrakṛdbhirnivāritam |

brahmaṇya jñānanāśāya vṛttivyāptirapekṣitā ||

iti pañcadaśī || 175||

Topic 176

``स्वयं प्रकाशमानत्वात् नाभास उपयुज्यते ।" इति च (पञ्चदशी ६.९२) ॥ १७६॥

svayaṁ prakāśamānatvāt nābhāsa upayujyate | iti ca || 176||

Topic 177

जडपदार्थाकार आकारित चित्तवृत्तेः विशेषोऽस्ति ॥ १७७॥

jaḍapadārthākāra ākārita cittavṛtte viśeṣo'sti || 177||

Topic 178

तथाहि ।- अयं घट इति घटाकाराकारित चित्तवृत्तिः अज्ञातं घटं विषयीकृत्य तद्गत अज्ञाननिरसनपुरःसरं स्वगत चिदाभासेन जडं घटमपि भासयति ॥ १७८॥

tathāhi |- ayaṁ ghaṭa iti ghaṭākārākārita cittavṛtti ajñātaṁ ghaṭaṁ viṣayīkṛtya tadgata ajñānanirasanapuraḥsaraṁ svagata cidābhāsena jaḍaṁ ghaṭamapi bhāsayati || 178||

Topic 180

यथा दीपप्रभामण्डलम् अन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकार निरसनपुरःसरं स्वप्रभया तदपि भासयतीति ॥ १८०॥

yathā dīpaprabhāmaṇḍalam andhakāragataṁ ghaṭapaṭādikaṁ viṣayīkṛtya tadgatāndhakāra nirasanapuraḥsaraṁ svaprabhayā tadapi bhāsayatīti || 180||

## Chapter 5

### Topic 181

एवं भूत स्वस्वरूप चैतन्य साक्षात्कारपर्यन्तं श्रवणमनन निदिध्यासन समाधि अनुष्ठानस्य अपेक्षितत्वात् तेऽपि प्रदर्श्यन्ते ॥ १८१ ॥

evaṁ bhūta svasvarūpa caitanya sākṣātkāraparyantaṁ śravaṇamanana nididhyāsana samādhi anuṣṭhānasya apekṣitatvāt te'pi pradarśyante || 181||

### Topic 182

श्रवणं नाम षड्विधलिङ्गैः अशेषवेदान्तानाम् अद्वितीय वस्तुनि तात्पर्य अवधारणम् ॥ १८२ ॥

śravaṇaṁ nāma ṣaḍvidhaliṅgai aśeṣavedāntānām advitīya vastuni tātparya avadhāraṇam || 182||

Topic 183

**लिङ्गानि तु उपक्रमोपसंहार अभ्यासापूर्वता फल अर्थवाद उपपत्त्याख्यानि ॥ १८३॥**

liṅgāni tu upakramopasaṁhāra abhyāsāpūrvatā phala arthavāda upapattyākhyāni || 183||

Topic 184

**तदुक्तम् -**

**``उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।**

**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥" ॥ १८४॥**

taduktam -

upakramopasaṁhārāvabhyāso'pūrvatāphalam |

arthavādopapattī ca liṅgaṁ tātparyanirṇaye || || 184||

### Topic 185

**प्रकरण प्रतिपाद्यस्य अर्थस्य तदाद्यन्तयोः उपपादनम् उपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये प्रकरण प्रतिपाद्यस्य अद्वितीय वस्तुन ``एकमेवाद्वितीयम्" (६.२.१) इत्यादौ ``ऐतदात्म्यमिदं सर्वम्" (६.८.७) इत्यन्ते च प्रतिपादनम् ॥ १८५॥**

prakaraṇa pratipādyasya arthasya tadādyantayo upapādanam upakramopasaṁhārau | yathā chāndogye ṣaṣṭhādhyāye prakaraṇa pratipādyasya advitīya vastuna ekamevādvitīyamityādau aitadātmyamidaṁ sarvamityante ca pratipādanam || 185||

### Topic 186

**प्रकरण प्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनम् अभ्यासः । यथा तत्रैव अद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् ॥ १८६ ॥**

prakaraṇa pratipādyasya vastuna tanmadhye paunaḥpunyena pratipādanam abhyāsaḥ | yathā tatraiva advitīyavastuni madhye tattvamasīti navakṛtvaḥ pratipādanam || 186||

## Topic 187

**प्रकरण प्रतिपाद्यस्य अद्वितीय वस्तुनः प्रमाणान्तरा अविषयीकरणम अपूर्वता । यथा तत्रैव अद्वितीय वस्तुनो मानान्तरा अविषयीकरणम् ॥ १८७॥**

prakaraṇa pratipādyasya advitīya vastunaḥ pramāṇāntarā aviṣayīkaraṇama apūrvatā | yathā tatraiva advitīya vastuno mānāntarā aviṣayīkaraṇam || 187||

## Topic 188

**फलं तु प्रकरण प्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र ``आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्ये" (६.१४.२) इति अद्वितीय वस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते ॥ १८८॥**

phalaṁ tu prakaraṇa pratipādyasya ātmajñānasya tadanuṣṭhānasya vā tatra tatra śrūyamāṇaṁ prayojanam | yathā tatra ācāryavānpuruṣo veda tasya tāvadeva ciraṁ yāvanna vimokṣyetha sampatsye iti advitīya vastujñānasya tatprāptiḥ prayojanaṁ śrūyate || 188||

Topic 189

**प्रकरण प्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः । यथा तत्रैव ``उत तं आदेशम् अप्राक्ष्यो येनाश्रुतं श्रुतं भवति अमतं मतं अविज्ञातं विज्ञातम्" (६.१.३) इति अद्वितीयवस्तु प्रशंसनम् ॥ १८९॥**

prakaraṇa pratipādyasya tatra tatra praśaṁsanaṁ arthavādaḥ | yathā tatraiva uta taṁ ādeśam aprākṣyo yenāśrutaṁ śrutaṁ bhavati amataṁ mataṁ avijñātaṁ vijñātam iti advitīyavastu praśaṁsanam || 189||

Topic 190

**प्रकरण प्रतिपाद्यार्थ साधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथा तत्र ``यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (६.१.४) इत्यादौ अद्वितीयवस्तु साधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ॥ १९०॥**

prakaraṇa pratipādyārtha sādhane tatra tatra śruyamāṇā yuktirupapattiḥ | yathā tatra yathā saumyaikena mṛtpiṇḍena sarvaṁ mṛnmayaṁ vijñātaṁ syāt vācārambhaṇaṁ vikāro

nāmadheyaṁ mṛttiketyeva satyam ityādau advitīyavastu sādhane vikārasya vācārambhaṇamātratve yuktiḥ śrūyate || 190||

**Topic 191**

**मननं तु श्रुतस्य अद्वितीय वस्तुनो वेदान्तानुगुण युक्तिभिः अनवरतं अनुचिन्तनम् ॥ १९१॥**

mananaṁ tu śrutasya advitīya vastuno vedāntānuguṇa yuktibhi anavarataṁ anucintanam || 191||

**Topic 192**

**विजातीय देहादि प्रत्यय रहित अद्वितीय वस्तु सजातीय प्रत्यय प्रवाहः निदिध्यासनम् ॥ १९२॥**

vijātīya dehādi pratyaya rahita advitīya vastu sajātīya pratyaya pravāha nididhyāsanam || 192||

Topic 193

समाधि द्विविधः सविकल्पको निर्विकल्पश्चेति ॥ १९३॥

samādhi dvividhaḥ savikalpako nirvikalpaśceti || 193||

Topic 194

तत्र सविकल्पको नाम ज्ञातृज्ञानादि विकल्पलय अनपेक्षया अद्वितीय वस्तुनि

तदाकाराकारिताया चित्तवृत्ते: अवस्थानम् ॥ १९४॥

tatra savikalpako nāma jñātṛjñānādi vikalpalaya anapekṣayā advitīya vastuni tadākārākāritāyā cittavṛtte avasthānam || 194||

Topic 195

तदा मृण्मयगजादि भानेऽपि मृद्भानवत् द्वैतभानेऽपि अद्वैतं वस्तु भासते ॥ १९५॥

tadā mṛṇmayagajādi bhāne'pi mṛdbhānavat dvaitabhāne'pi advaitaṁ vastu bhāsate || 195||

Topic 196

तदुक्तम् -

``दृशिस्वरूपं गगनोपमं परम्

सकृद्विभातं त्वजमेकमक्षरम् ।

अलेपकं सर्वगतं यदद्वयम्

तदेव चाहं सततं विमुक्तमोम् ॥" इति

(उपदेशसाहस्री ७३.१०.१) ॥ १९६॥

taduktam -

dṛśisvarūpaṁ gaganopamaṁ param

sakṛdvibhātaṁ tvajamekamakṣaram |

alepakaṁ sarvagataṁ yadadvayam

tadeva cāhaṁ satataṁ vimuktamom ||

iti upadeśasāhasrī || 196||

## Topic 197

निर्विकल्पकस्तु ज्ञातृज्ञानादि विकल्पलय अपेक्षय अद्वितीयवस्तुनि तदाकाराकारिताया: चित्तवृत्ते: अतितराम् एकीभावेन अवस्थानम् ॥ १९७॥

nirvikalpakastu jñātṛjñānādi vikalpalaya apekṣaya advitīyavastuni tadākārākāritāyā cittavṛtte atitarām ekībhāvena avasthānam || 197||

## Topic 198

तदा तु जलाकाराकारित लवणानवभासेन जलमात्र अवभासवत् अद्वितीय वस्तु आकाराकारित चित्तवृत्ति अनवभासेन अद्वितीय वस्तु मात्रम् अवभासते ॥ १९८॥

tadā tu jalākārākārita lavaṇānavabhāsena jalamātra avabhāsavat advitīya vastu ākārākārita cittavṛtti anavabhāsena advitīya vastu mātram avabhāsate || 198||

**Topic 199**

**ततश्चास्य सुषुप्तेश्च अभेदशङ्का न भवति । उभयत्र वृत्ति अभाने समानेऽपि तत्सद्भावासद्भाव मात्रेण अनयोर्भेदोपपत्तेः ॥ १९९॥**

tataścāsya suṣupteśca abhedaśaṅkā na bhavati | ubhayatra vṛtti abhāne samāne'pi tatsadbhāvāsadbhāva mātreṇa anayorbhedopapatteḥ || 199||

**Topic 200**

**अस्याङ्गानि यमनियमासन प्राणायामप्रत्याहार धारणाध्यानसमाधयः ॥ २००॥**

asyāṅgāni yamaniyamāsana prāṇāyāmapratyāhāra dhāraṇā dhyānasamādhayaḥ || 200||

**Topic 201**

**तत्र ``अहिंसा सत्य अस्तेयब्रह्मचर्य अपरिग्रहा यमाः” ॥ २०१॥**

tatra ahiṁsā satya asteyabrahmacarya aparigrahā yamāḥ

|| 201||

**Topic 202**

``शौच सन्तोष तपः स्वाध्याय ईश्वरप्रणिधानानि नियमाः”  ॥२०२॥

śauca santoṣa tapaḥ svādhyāya īśvarapraṇidhānāni niyamāḥ

||202||

**Topic 203**

करचरणादि संस्थान विशेष लक्षणानि पद्म स्वस्तिकादि अन्यासनानि ॥ २०३॥

karacaraṇādi saṁsthāna viśeṣa lakṣaṇāni padma svastikādi anyāsanāni || 203||

**Topic 204**

रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ॥ २०४॥

recakapūrakakumbhakalakṣaṇāḥ prāṇanigrahopāyāḥ prāṇāyāmāḥ || 204||

## Topic 205

**इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ॥ २०५॥**

indriyāṇāṁ svasvaviṣayebhyaḥ pratyāharaṇaṁ pratyāhāraḥ || 205||

## Topic 206

**अद्वितीय वस्तुनि अन्तरिन्द्रिय धारणं धारणा ॥ २०६.।**

advitīya vastuni antarindriya dhāraṇaṁ dhāraṇā || 206|

## Topic 207

**तत्र अद्वितीय वस्तनि विच्छिद्य विच्छिद्य अन्तरिन्द्रिय वृत्ति प्रवाहः ध्यानम् ॥ २०७॥**

tatra advitīya vastani vicchidya vicchidya antarindriya vṛtti pravāhaḥ dhyānam || 207||

## Topic 208

**समाधिस्तूक्तः सविकल्पक एव ॥ २०८॥**

samādhistūktaḥ savikalpaka eva || 208||

Topic 209

एवमस्याङ्गिनः  निर्विकल्पकस्य लयविक्षेप कषायरसा स्वादलक्षणाः चत्वारो विघ्नाः सम्भवन्ति ॥ २०९॥

evamasyāṅginaḥ  nirvikalpakasya layavikṣepa kaṣāyarasā svādalakṣaṇā catvāro vighnāḥ sambhavanti || 209||

Topic 210

लयस्तावत् अखण्डवस्तु अनवलम्बनेन चित्तवृत्तेर्निद्रा ॥ २१०॥

layastāvat akhaṇḍavastu anavalambanena cittavṛtternidrā || 210||

Topic 211

अखण्डवस्तु अनवलम्बनेन चित्तवृत्तेः अन्यावलम्बनं विक्षेपः ॥ २११॥

akhaṇḍavastu anavalambanena cittavṛtte anyāvalambanaṁ vikṣepaḥ || 211||

Page 212

लयविक्षेप अभावेऽपि चित्तवृत्तेः रार्गादि वासनया स्तब्धीभावात् अखण्ड वस्तु अनवलम्बनं कषायः ॥ २१२॥

layavikṣepa abhāve'pi cittavṛtteḥ rārgādi vāsanayā stabdhībhāvāt akhaṇḍa vastu anavalambanaṁ kaṣāyaḥ || 212||

Topic 213

अखण्ड वस्तु अनवलम्बनेनापि चित्तवृत्तेः सविकल्पक आनन्दास्वादनं रसास्वादः । समाध्यारम्भ समये सविकल्पक आनन्दास्वादनं वा ॥ २१३॥

akhaṇḍa vastu anavalambanenāpi cittavṛtteḥ savikalpaka ānandāsvādanaṁ rasāsvādaḥ | samādhyārambha samaye savikalpaka ānandāsvādanaṁ vā || 213||

**Topic 214**

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वात दीपवत् अचलं सत् अखण्ड चैतन्यमात्रम् अवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते ॥ २१४॥

anena vighnacatuṣṭayena virahitaṁ cittaṁ nirvāta dīpavat acalaṁ sat akhaṇḍa caitanyamātram avatiṣṭhate yadā tadā nirvikalpakaḥ samādhirityucyate || 214||

**Topic 215**

तदुक्तम् -

"लये सम्बोधयेच्चितं विक्षिप्तं शमयेत्पुनः ।

सकषायं विजानीयात् समप्राप्तं न चालयेत् ॥

नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति च (गौडपादकारिका ३.४४-४५)

``यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता" इति च (गीता ६ - १९) ॥ २१५॥

taduktam -

laye sambodhayeccitaṁ vikṣiptaṁ śamayetpunaḥ |

sakaṣāyaṁ vijānīyāt samaprāptaṁ na cālayet ||

nāsvādayedrasaṁ tatra niḥsaṅgaḥ prajñayā bhavet iti ca

yathā dīpo nivātastho neṅgate sopamā smṛtā iti ca || 215||

## Chapter 6

### Topic 216

अथ जीवन्मुक्तलक्षणमुच्यते ॥ २१६॥

atha jīvanmuktalakṣaṇamucyate || 216||

### Topic 217

जीवन्मुक्तो नाम स्वस्वरूप अखण्ड ब्रह्मज्ञानेन तदज्ञानबाधन द्वारा स्वस्वरूप अखण्ड ब्रह्मणि साक्षात्कृते अज्ञान तत्कार्य सञ्चितकर्म संशय विपर्ययादि नामपि बाधितत्वात् अखिल बन्धरहितो ब्रह्मनिष्ठः ॥ २१७॥

jīvanmukto nāma svasvarūpa akhaṇḍa brahmajñānena tadajñānabādhana dvārā svasvarūpa akhaṇḍa brahmaṇi sākṣātkṛte ajñāna tatkārya sañcitakarma saṁśaya viparyayādi nāmapi bādhitatvāt akhila bandharahito brahmaniṣṭhaḥ || 217||

**Topic 218**

``भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ” इत्यादिश्रुतेः (मुण्ड उ २.२.८) ॥ २१८॥

bhidyate hṛdayagranthih chidyante sarvasaṁśayāḥ | kṣīyante cāsya karmāṇi tasmindṛṣṭe parāvare || ityādiśruteḥ || 218||

**Topic 219**

अयं तु व्युत्थान समये मांस शोणित मूत्र पुरीषादि भाजनेन शरीरेण आन्ध्यमान्द्य अपटुत्वादि भाजनेन इन्द्रियग्रामेण अशनापिपासा शोकमोहादि भाजनेन अन्तःकरणेन च पूर्वपूर्व वासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्ध आरब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति । यथेन्द्रजालमिति ज्ञानवान् तदिन्द्रजालं पश्यन्नपि परमाथं इदं इति न पश्यति ॥ २१९॥

ayaṁ tu vyutthāna samaye māṁsa śoṇita mūtra purīṣādi bhājanena śarīreṇa āndhyamāndya apaṭutvādi bhājanena indriyagrāmeṇa aśanāpipāsā śokamohādi bhājanena

antaḥkaraṇena ca pūrvapūrva vāsanayā kriyamāṇāni karmāṇi bhujyamānāni jñānāviruddha ārabdhaphalāni ca paśyannapi bādhitatvāt paramārthato na paśyati | yathendrajālamiti jñānavān tadindrajālaṁ paśyannapi paramāthaṁ idaṁ iti na paśyati || 219||

Topic 220

``सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इत्यादिश्रुतेः ॥ २२० ॥

sacakṣuracakṣuriva sakarṇo'karṇa iva ityādiśruteḥ || 220||

Topic 221

उक्तञ्च -

``सुषुप्तवत् जाग्रति यो न पश्यति

द्वयं च पश्यन्नपि चाद्वयत्वतः ॥

तथा च कुर्वन्नपि निष्क्रियश्च यः

स आत्मविन्नान्य इतीह निश्चयः ॥" इति (उपदेशसाहस्री ५) ॥ २२१ ॥

uktañca -

suṣuptavat jāgrati yo na paśyati

dvayaṁ ca paśyannapi cādvayatvataḥ ||

tathā ca kurvannapi niṣkriyaśca yaḥ

sa ātmavinnānya itīha niścayaḥ ||iti || 221||

**Topic 222**

**अस्य ज्ञानात्पूर्वं विद्यमानानामेव आहार विहारादीनाम् अनुवृत्तिवत् शुभवासनानामेव अनुवृत्तिर्भवति शुभाशुभयो: औदासीन्यं वा ॥ २२२॥**

asya jñānātpūrvaṁ vidyamānānāmeva āhāra vihārādīnām anuvṛttivat śubhavāsanānāmeva anuvṛttirbhavati śubhāśubhayoḥ audāsīnyaṁ vā || 222||

Topic 223

तदुक्तम् । -

``बुद्धाद्वैत सतत्त्वस्य यथेष्टा चरणं यदि ।

शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥ इति (नैष्कर्म्यसिद्धिः ४.६२)

``ब्रह्मवित्तं तथा मुक्त्वा स आत्मज्ञो न चेतरः ॥" इति च (उपदेशसाहस्री १२।१३) ॥ २२३॥

taduktam | -

buddhādvaita satattvasya yatheṣṭā caraṇaṁ yadi |

śunāṁ tattvadṛśāñcaiva ko bhedo'śucibhakṣaṇe || iti naiṣkarmyasiddhiḥ 462

brahmavittaṁ tathā muktvā sa ātmajño na cetaraḥ || iti ca || 223||

Topic 224

तदानीं अमानित्वादीनि ज्ञानसाधनानि अद्वेष्टृत्वादयःसद्गुणाश्च अलङ्कारवत् अनुवर्तन्ते ॥ २२४॥

tadānīṁ amānitvādīni jñānasādhanāni adveṣṭṛatvādayaḥ sadguṇāśca alaṅkāravat anuvartante || 224||

Topic 225

तदुक्तम् -

``उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।

अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥" इति (नैष्कर्म्यसिद्धिः ४.६९) ॥ २२५॥

utpannātmāvabodhasya hyadveṣṭṛtvādayo guṇāḥ |

ayatnato bhavantyasya na tu sādhanarūpiṇaḥ ||iti || 225||

Topic 226

किं बहुन अयं देहयात्रा मात्रार्थं इच्छानिच्छा परेच्छा प्रापितानि सुख दुःख लक्षणानि आरब्ध फलानि अनुभवन् अन्तःकरण आभासादीनाम् अवभासकःसन् तदवसाने प्रत्यगानन्द परब्रह्मणि प्राणे लीने सति अज्ञान तत्कार्य संस्काराणामपि विनाशात् परमकैवल्यम् आनन्दैकरसम् अखिल भेदप्रतिभास रहितम् अखण्डब्रह्म अवतिष्ठते ॥ २२६॥

kiṁ bahuna ayaṁ dehayātrā mātrārthaṁ icchānicchā parecchā prāpitāni sukha duḥkha lakṣaṇāni ārabdha phalāni anubhavan antaḥkaraṇa ābhāsādīnām avabhāsakaḥsan tadavasāne pratyagānanda parabrahmaṇi prāṇe līne sati ajñāna tatkārya saṁskārāṇāmapi vināśāt paramakaivalyam ānandaikarasam akhila bhedapratibhāsa rahitam akhaṇḍabrahma avatiṣṭhate || 226||

Topic 227

`न तस्य प्राणा उत्क्रामन्ति”  (बृ उ ४.४.६)

``अत्रैव समवनीयन्ते”  (बृ उ ३.२.११)

``विमुक्तश्च विमुच्यते”  (कठ उ ५.१) इत्यादिश्रुतेः ॥ २२७॥

na tasya prāṇā utkrāmanti

atraiva samavanīyante

vimuktaśca vimucyate

ityādiśruteḥ || 227||

इति सदानन्द योगीन्द्र विरचितो वेदान्तसारनाम ग्रन्थः समाप्तः ।

iti sadānanda yogīndra viracito vedāntasāranāma granthaḥ samāptaḥ |

……………..………..xxxxxxx………………………………………

`